# Daridraya Dahana Stotram

## ॥ दारिद्र्य दहन स्तोत्रम ॥

विश्वेश्वराय नरकार्णव तारणाय कणामृताय शशिशेखरधारणाय ।
कर्पूरकान्तिधवलाय जटाधराय दारिद्र्य दुःखदहनाय नमः शिवाय ॥१॥

Vishveshvaraya narakarnava taranaya
karnamrutaya shashishekhara dharanaya
karpurakantidhavalaya jatadharaya
daridrya duhkhadahanaya namah shivaya

गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधिपकङ्कणाय ।
गंगाधराय गजराजविमर्दनाय दारिद्र्य दुःखदहनाय नमः शिवाय ॥२॥

Gauripriyaya rajanishakaladharaya
kalantakaya bhujagadhipankanaya
gangadharaya gajarajavimardanaya
daridrya dukhadahanaya namah shivaya

भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्य दुःखदहनाय नमः शिवाय ॥३॥

Bhaktipriyaya bhavarogabhayapahaya
ugraya durgabhavasagarataranaya
jyotirmayaya gunanamasunutyakaya
daridrya duhkha dahanaya namah shivaya

चर्मम्बराय शवभस्मविलेपनाय भालेक्षणाय मणिकुण्डलमण्डिताय ।
मंझीरपादयुगलाय जटाधराय दारिद्र्य दुःखदहनाय नमः शिवाय ॥४॥

Charmambaraya shavabhasmavilepanaya
bhalekshanaya manikundala manditaya
manjirapadayugalaya jatadharaya
daridrya duhka dahanaya namah shivaya

पञ्चाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय तमोमयाय दारिद्र्य दुःखदहनाय नमः शिवाय ॥५॥

Panchananaya phaniraja vibhushanaya
hemamshukaya bhuvanatrayamanditaya
anandabhumivaradaya tamomayaya
daridrya duhka dahanaya namah shivaya

भानुप्रियाय भवसागरतारणायकालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षण लक्षिताय दारिद्र्य दुःखदहनाय नमः शिवाय ॥६॥

Bhanupriyaya bhavasagarataranaya
kalantakaya kamalasanapujitaya
netratrayaya shubhalakshana lakshitaya
daridrya duhka dahanaya namah shivaya

रामप्रियाय रघुनाथवरप्रदायनागप्रियाय नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्य दुःखदहनाय नमः शिवाय ॥७॥

Ramapriyaya raghunathavarapradaya
nagapriyaya narakarnavataranaya
punyeshu punyabharitaya surarchitaya
daridrya duhka dahanaya namah shivaya

मुक्तेश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय दारिद्र्य दुःखदहनाय नमः शिवाय ॥८॥

Mukteshwaraya phaladaya ganeshwaraya
gitapriyaya vrushabheshwara vahanaya
matangacharmavasanaya maheshwaraya
daridrya duhka dahanaya namah shivaya

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणं ।
सर्वसंपत्करं शीघ्रं पुत्रपौत्रादिवर्धनम् ।
त्रिसंध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥

Vasisthena kritam stotram sarvaroga nivaranam
Sarvasampatkaram siighram putrapautradi vardhanam
trisandhyam yah patennithyam sa hi svargamavapnuyat ||

InstaAstro